गोपनं, क्ली, ( गुप् + भावे ल्युट् । ) अपह्नवः । ( यथा, महानिर्व्वाणतन्त्रे । ४ । ७६ ।
"गोपनाह्नीयते सत्यं न गुप्तिरनृतं विना ।
तस्मात् प्रकाशतः कुर्य्यात् कौलिकः कुलसाधनम् ॥" )
कुत्सनम् । रक्षा । ( यथा, राजेन्द्रकर्णपूरे ।३४।
"अधिकं समाप्तसमरः प्रथितो भुवनेषु गोपनरसोत्सुकः ॥")
व्याकुलत्वम् । दीप्तिः । इति कविकल्पद्रुमे गुपधात्वर्थदर्शनात् ॥ तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

गोपनीयं, त्रि, ( गुप् + अनीयर् । ) गोप्यम् । गोपितव्यम् । यथा,—
"स्वर्गेऽपि दुर्लभा विद्या गोपनीया प्रयत्नतः ।"
इति नाड़ीप्रकाशः ॥

गोपवधूः, स्त्री, ( गोपस्य वधूरिव प्रियत्वात् । गोपान् बध्नाति स्वगुणेन इति वा । बन्ध + बाहुलकात् ऊन् । ) शारिवा । इति भावप्रकाशः ॥ गोपस्य पत्नी च ॥ (यथा, गीतगोविन्दे । १ । ४१ ।
"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।
गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ॥" )

गोपभद्रं, क्ली, ( गोपे भद्रमिव । ) शालूकम् । इति शब्दचन्द्रिका ॥

गोपभद्रा, स्त्री, ( गोपानां भद्रं मङ्गलं यस्याः यस्यां वा गोपाद्यारण्यकजातिभिः पूज्यत्वादस्यास्तथात्वम् । ) काश्मरीवृक्षः । इति राजनिर्घण्टः ॥

गोपभद्रिका, स्त्री, (गोपभद्रा संज्ञायां कन् । टापि अत इत्वञ्च ।) गम्भारीवृक्षः । इति रत्नमाला ॥

गोपरसः, पुं, (गोपः गन्धद्रव्यविशेषः । गोपः रसोऽस्य । गोपः अभ्यन्तरगुप्तो रसो यस्मिन् वा । ) बोलः । इति शब्दरत्नावली ॥

गोपवल्ली, स्त्री, ( गां पाति रक्षतीति । पा + कः । टाप् । गोपा चासौ वल्ली चेति कर्म्मधारयः । ) मूर्व्वा । शारिवा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा,—
"गोपवल्ली कराला च सुगन्धा भद्रवल्लिका ।
गोपीभद्रा तथागन्ता नागजिह्वातिशारिवा ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा च सुश्रुत उत्तरतन्त्रे ५१ अध्याये ।
"गोपवल्ल्युदके सिद्धं स्यादन्यद्द्विगुणे घृतम् ॥")
श्यामालता । इति शब्दरत्नावली ॥

गोपा, स्त्री, (गां पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।"३।२।३। इति कः । स्त्रियां टाप् ।) श्यामालता । इत्यमरटीका शब्दरत्नावली च ॥ (गाः पाति रक्षतीति । पा रक्षणे + क्वप्राप्तिविषये वासरूपन्यायेन "आतो मनिन्क्वनिप्वनिपश्च ।" ३ । २ । ७४ । इति चेन विच् अदन्तत्वाभावादाप् विधेरभावे गोपा गोरक्षाकर्त्ता । गोपा विश्वपावदिति मुग्धबोधव्याकरणम् ॥ )

गोपानसी, स्त्री, (गोपायति रक्षति गृहमिति । गुपू ञ रक्षणे + बाहुलकात् असच् यलोपस्ततो ङीप् च ।) वड़भी । गृहाणामग्रभागे दत्तवक्रकाष्ठम् । मुदनी इति भाषा ॥ इत्यमरटीकासारसुन्दरी ॥ गृहचूड़ा वड़भी तच्छादनार्थं वक्रीकृत्य यत् काष्ठं दीयते सा वड़भी चतुष्किकादिचूड़ा तच्छादनाय वक्रीकृत्य यत् काष्ठं दीयते सा । इति मधुः ॥ पटलाधोवंशपञ्जरम् । इति भट्टः ॥ कर्णिकाविष्कम्भिदारु इत्यन्ये । वक्रीभूतं धरणकाष्ठम् । इत्येके । इत्यमरटीकायां भरतः ॥ ( यथा, माघे । ३ । ४६ ।
"गोपानसीषु क्षणमास्थिताना-
मालम्बिभिश्चन्द्रकिणां कलापैः ।
हरिन्मणिश्यामतृणाभिरामै-
र्गृहाणि नीध्रैरिव यत्र रेजुः ॥")

गोपायितं, त्रि, ( गुपू ञ रक्षणे । गोपाय्यते स्म इति । गोपाय + कर्म्मणि क्तः ।"आयादय आर्द्धधातुके वा ।" ३ । १ । ३१ । इति आयागमश्च ।) रक्षितम् । इत्यमरः । ३ । १ । १०६ ॥ (भावे क्तः रक्षणम् ॥)

गोपालः, पुं, ( गाः पालयतीति । गा + पाल + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ) गवां पालकः । वृन्दावनस्थगोपालानां स्वरूपं यथा,
"गोपाला मुनयः सर्व्वे वैकुण्ठानन्दमूर्त्तयः ॥"
इति पद्मपुराणे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्यम् ॥ * ॥ ( गां पृथिवीं पालयतीति । गो + पाल + अण् । ) राजा । ( गां पृथिवीं वेदं वा पालयतीति । ) नन्दनन्दनः कृष्णः । इति मेदिनी । ले । ८६ ॥*॥ श्रीगोपालस्य ध्यानं यथा,
"अव्यादव्याकोषनीलाम्बुजरुचिररुणाम्भोजनेत्रोऽम्बुजस्थो
बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको मुकुन्दः ।
दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विश्ववन्द्यो
गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषश्चिरं वः ॥"
इति तन्त्रसारः ॥ * ॥
तस्य स्वरूपं यथा,—
श्रीव्यास उवाच ।
"ततोऽहमब्रुवं हृष्टः पुलकोत्फुल्लविग्रहः ।
त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन ! ॥
यत्तत् सत्यं परं ब्रह्म जगद्योनिर्जगत्पतिः ।
वदन्तं वेद शिरसि चाक्षुषं नाथ ! मेऽस्तु तत् ॥
श्रीभगवानुवाच ।
ब्रह्मणैवं पुरा पृष्टः प्रार्थितश्च यथा पुरा ।
यदवोचमहं तस्मै तत्तुभ्यमपि कथ्यते ॥
मामेके प्रकृतिं प्राहुः पुरुषञ्च तथेश्वरम् ।
धर्म्ममेके धनञ्चैके मोक्षमेकेऽकुतोभयम् ॥
शून्यमेके भावमेके परमार्थमथापरे ।
दैवमेके देवमेके ग्रहमेके मनः परे ॥
बुद्धिमेके कालमेके शिवमेके सदाशिवम् ।
अपरे वेदशिरसि स्थितमेकं सनातनम् ॥
सद्भावं विक्रियाहीनं सच्चिदानन्दविग्रहम् ।
मन्मायामोहितधियः सर्व्वकालेषु वञ्चिताः ॥
कोऽपि वेद पुमान् लोके मदनुग्रहभाजनः ।
पश्चात् दर्शयिष्यामि स्वं रूपं वेदगोपितम् ॥
ततोऽपश्यमहं भूप ! बालं बालाम्बुदप्रभम् ।
गोपकन्यावृतं गोपं हसन्तं गोपबालकैः ॥
कदम्बमूलमासीनं पीतवाससमद्भुतम् ।
वनं वृन्दावनं नाम नवपल्लवमण्डितम् ॥
कोकिलभ्रमरारावमनोभवमनोहरम् ।
नदीमपश्यं कालिन्दीमिन्दीवरदलप्रभाम् ॥
गोवर्द्धनं तथापश्यं कृष्णावामकरोद्धृतम् ।
महेन्द्रदर्पनाशाय गोगोपालसुखावहम् ॥
दृष्ट्वा विहृष्टो ह्यभवं सर्व्वभूषणभूषणम् ।
गोपालमबलासङ्गमुदितं वेणुनादितम् ॥
ततो मामाह भगवान् वृन्दावनचरः स्वयम् ।
यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनम् ॥
निष्कलं निष्क्रमं शान्तं सच्चिदानन्दविग्रहम् ।
पूर्णं पद्मपलाशाक्षं नातः परतरं मम ॥
इदमेव वदन्त्येते वेदाः कारणकारणम् ।
सत्यं व्यापि परानन्दचिद्घनं शाश्वतं शिवम् ॥
नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा ।
यमुनां गोपकन्याश्च तथा गोपालबालकान् ॥
ममावतारो नित्योऽयमत्र मा संशयं कृथाः ।
ममेष्टा हि सदा राधा सर्व्वज्ञोऽहं परात्परः ॥
मयि सर्व्वमिदं विश्वं भाति मायाविजृम्भितम् ॥"
इति पद्मपुराणे पातालखण्डम् ॥ * ॥
द्वादशगोपालाश्चैतन्यशब्दे द्रष्टव्याः ॥

गोपालकः, पुं, ( गां पशुं जीवजातमित्यर्थः पालयति रक्षतीति । गो + पालि + ण्वुल् ।) शिवः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णः । यथा,—
"दाता फलानामभिवाञ्छितानां
प्रागेव गोपालकमन्त्र एषः ।
क्रमदीपिका ॥
गोपालशब्दात् स्वार्थे के गोरक्षकश्च ॥ ( यद्वा, गवां पालकः रक्षकः । पालि + ण्वुल् । यथा, महाभारते । ३ । २३६ । ६ ।
"अथ संस्मारणां कृत्वा लक्षयित्वा त्रिहायणान् ।
वृतो गोपालकैः प्रीतो व्यहरत् कुरुनन्दनः ॥"
चण्डमहासेननृपतेः पुत्रयोरन्यतरः । यथा, कथासरित्सागरे । ११ । ७४ ।
"जातौ द्वौ तनयौ चण्डमहासेनस्य भूपतेः ।
एको गोपालको नाम द्वितीयः पालकस्तथा ॥")

गोपालकर्कटी, स्त्री, ( गोपालप्रिया कर्कटी फलविशेषः ।) कर्कटीभेदः । गोयालकाँकरी गुरुभा इति च हिन्दी भाषा ॥ तत्पर्य्यायः । वन्या २ गोपकर्कटिका ३ क्षुद्रेर्व्वारुः ४ क्षुद्रफला ५ गोपाली ६ क्षुद्रचिर्भिटा ७ । अस्या गुणाः । शीतत्वम् । मधुरत्वम् । पित्तमूत्रकृच्छ्राश्मरीमेहदाहशोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

गोपालिका, स्त्री, (गोपालकस्य गोरक्षकस्य पत्नी । "पालकान्तात् न ।" ४ । १ । ४८ । इत्यस्य